# ॥ सङ्कटमोचन हनुमानाष्टकम् ॥

- ततः स तुलसीदासः सस्मार रघुनन्दनम् ।
  हनूमन्तं तत्पुरस्तात् तुष्टाव भक्तरक्षणम् ॥ ॥ १॥
- धनुर्बाण धरोवीरः सीता लक्ष्मण सयुतः ।
  रामचन्द्रस्सहायो मां किं करिष्यत्युयं मम ॥ ॥ २॥
- ॐ हनुमानञ्जनी सूनो वायुपुत्रो महाबलः ।
  महालाङ्गूल निक्षेपैर्निहताखिल राक्षसाः ॥ ॥ ३॥
- श्रीराम हृदयानन्द विपत्तौशरणं तव ।
  लक्ष्मणे निहिते भूमौ नीत्वा द्रोणाचलं युतम् ॥ ॥ ४॥
- यया जीवित वा नाद्य ता शक्तिं प्रकटीं कुरु ।
  येन लङ्केश्वरो वीरो निःशङ्कः विजितस्त्वया ॥ ॥ ५॥
- दुर्निरीक्ष्योऽपिदेवानी तद्बलं दर्शयाधुना ॥ ॥ ६॥
- यया लङ्कां प्रविश्य त्वं ज्ञातवान् जानकी स्वयं ।
  रावणांतः पुरेऽत्युग्रेतां बुद्धिं प्रकटी कुरु ॥ ॥ ७॥
- रुद्रावतार भक्तार्ति विमोचन महाभुज ।
  कपिराज प्रसन्नस्त्वं शरणं तव रक्ष माम् ॥ ॥ ८॥
- इत्यष्टकं हनुमतः यः पठेत् श्रद्धयान्वितः ।
  सर्वकष्ट विनिर्मुक्तो लभते वाञ्छितफलम् ॥
- ग्रहभूतार्दितेघोरे रणे राजभयेऽथवा ।
  त्रिवारं पठेनाच्छ्रीघ्रं नरो मुच्येत् सङ्कटात् ॥

॥ इति श्री गोस्वामि तुलसीदास विरचितं श्रीहनुमान्नाष्टकं सम्पूर्णम् ॥